**Stotra Literature: Some Metaphors and Imagery**

**Light and Fire**

महतः परितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे ।
दिननाथ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि नः॥३॥

mahataḥ paritaḥ prasarpatas
tamaso darśana-bhedino bhide
dina-nātha iva svatejasā
hṛdaya-vyomni manāg udehi naḥ

O Breaker of this great darkness that is creeping all around, dividing our vision – please rise up, like the sun, just a little bit, in the space of our hearts.

कदम्बवनमध्यगां कनकमंडलोपस्थितां
षडम्बुरुहवासिनीं सततसिद्धसौदामिनीम् ।
विडंबितजपारुचिं विकचचन्द्रचूडामणिं
त्रिलोचनकुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ।।४।।

kadamba-vana-madhya-gāṁ kanaka-maṇḍalopasthitāṁ
ṣaḍ-amburuha-vāsinīṁ satata-siddha-saudāminīṁ
viḍaṁbita-japā-ruciṁ vikaca-candra-cūḍā-maṇīṁ
tri-locana-kuṭumbinīṁ tri-pura-sundarīm āśraye

I take refuge in Tripurasundarī, the wife of the three-eyed one, she who goes in the middle of the Kadamba forest, established on a golden disk, dwelling in the six lotuses, lightning for the eternal sages, whose beauty puts to shame the Japā flower, she who has the full moon for a crest jewel.

विद्युदुद्द्योतवत्प्रस्फुरद्वाससं प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम्  ।
वन्यया मालया शोभितोरःस्थलं लोहितांघ्रिद्वयं वारिजाक्षं भजे  ॥७॥

(7.) vidyud-uddyotavat-prasphurad-vāsasaṁ
prāvṛḍ-ambhodavat-prollasad-vigraham
vanyayā mālayā śobhitoraḥ-sthalaṁ
lohitāṅghri-dvayaṁ vārijākṣaṁ bhaje

चेतोदर्पणमार्जनं भवमहादावाग्निनिर्वापणं
श्रेयःकैरवचन्द्रिकावितरणं विद्यावधूजीवनम् ।
आनन्दाम्बुधिवर्द्धनं प्रतिपदं पूर्णामृतास्वादनं
सर्वात्मस्नपनं परं विजयते श्रीकृष्णसङ्कीर्तनम् ॥१॥

(1.) ceto-darpaṇa-mārjanaṁ bhava-mahā-dāvāgni-nirvāpaṇam
śreyaḥ-kairava-candrikā-vitaraṇam vidyā-vadhū-jīvanam
ānandāmbudhi-vardhanaṁ pratipadaṁ pūrṇāmṛtāsvādanaṁ
sarvātma-snapanaṁ paraṁ vijayate śrīkṛṣṇa-saṅkīrtanam

भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषाम्  ।
दहते भवबीजसन्ततिं शिखिनेऽनेकशिखाय ते नमः  ।।३८।।

(38.) bhavataḥ smaratāṁ sadāsane
jayini brahmamaye niṣeduṣām
dahate bhava-bīja-santatiṁ
śikhine'nekaśikhāya te namaḥ

**The Ocean–Joining and traversing**

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्   |
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः   ||३||

(3.) satyapi bhedāpagame,
nātha tavāhaṁ na māmakīnas tvam
sāmudro hi taraṅgaḥ,
kvacana samudro na tāraṅgaḥ

त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषां
नृणाम् एको गम्यस्त्वमसि पयसामर्णव इव ।। ।।

trayī sāṅkhyaṁ yogaḥ paśupati-mataṁ vaiṣṇavam iti
prabhinne prasthāne param idam adaḥ pathyam iti ca
rucīnāṁ vaicitryād ṛju-kuṭila-nānā-patha-juṣāṁ
nṛṇām eko gamyas tvam asi payasām arṇava iva

The Vedas, Sāṅkhya philosophy, Yoga, Paśupati-mataṁ the worship of Viṣṇu – thus about different paths it is said that - this one is highest- that one is wholesome. Of all people, due to their differences of taste, liking various paths, some straight, some crooked – you are the one goal. Just as all waters flow to the sea.

यन्मायावशवर्तिविश्वमखिलं ब्रह्मादिदेवासुराः
यत्सत्त्वादमृषैव भाति सकलं रज्जौ यथाऽहेर्भ्रमः।
यत्पादः प्लव एक एव हि भवाम्भोधेस्तितीर्षावतां
वन्देऽहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥२॥

(2.) yan–māyā–vaśa–varti viśvam akhilaṁ
brahmādi–devāsurāḥ
yat–sattvād amṛṣeva bhāti sakalaṁ

rajjau yathā'her bhramaḥ Å
yat-pādaḥ plava eka eva hi bhavām-
bhodhes titīrṣāvatām
vande'haṁ tam aśeṣa-kāraṇa-paraṁ
rāmākhyam īśaṁ harim Ç

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ।।

medhāsi devi viditākhila-śāstra-sārā
durgāsi durga-bhava-sāgara-naur asaṅgā
śrīḥ kaiṭabhāri-hṛdayaika-kṛtādhivāsā
gaurī tvam eva śaśi-mauli-kṛta-pratiṣṭhā

**The wind**

तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्म यतः परं पवित्रम् ।
परितो दुरितानि यः पुनीते शिव तस्मै पवनात्मने नमस्ते ।।३७।।

(37.) tarasā bhuvanāni yo bibharti
dhvanati brahma yataḥ paraṁ pavitram
parito duritāni yaḥ punīte
śiva tasmai pavanātmane namaste Kirātārjunīyam – work Bhāravi

**The Universe Entire etc.**

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह–
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
पतिच्छन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत् त्वं न भवसि ॥२६॥

(26.) tvam arkas tvaṁ soma stvam asi pavanast vaṁ hutavaha-
stvam āpas tvaṁ vyoma tvam u dharaṇir ātmā tvam iti ca
paricchinnām evaṁ tvayi pariṇatā bibhrati giram
na vidmastat tattvaṁ vayamiha tu yat tvam na bhavasi

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च  होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः

yā sṛṣṭiḥ sraṣṭur ādyā vahati vidhi-hutaṁ yā havir yā ca hotrī
ye dve kālaṁ vidhattaḥ śruti-viṣaya-guṇā yā sthitā vyāpya viśvam
yām āhuḥ sarva-bīja-prakṛtir iti yayā prāṇinaḥ prāṇavantaḥ
pratyakṣābhiḥ prapannas tanubhir avatu vas tābhir aṣṭābhir īśaḥ

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभो
स्तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥९॥

(9.) bhūr-ambhāṁsyanalo'nilo'mbaram ahar-nātho himāṁśuḥ pumān
ityābhāti carācarātmakam idaṁ yasyaiva mūrtyaṣṭakam
nānyat kiñcana vidyate vimṛśatāṁ yasmāt parasmād vibhos
tasmai śrī gurumūrtaye nama idam śrīdakṣiṇāmūrtaye

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ॥
यदालोक्याह्लादं ह्रद इव निमज्याामृतमये

दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥२५॥

(25.) manaḥ pratyakcitte savidham avadhāyāttamarutaḥ
prahṛṣyad-romāṇaḥ pramada-salilotsaṅgita-dṛśaḥ
yad ālokyāhlādaṁ hrada iva nimajyāmṛtamaye
dadhatyantas tattvaṁ kimapi yaminastat kila bhavān

तेजोमयं सगुणनिर्गुणमद्वितीयम्
आनन्दकन्दमपराजितमप्रमेयम् ।
नादात्मकं सकलनिष्कलमात्मरूपम्
वाराणसीपुरपतिम् भज विश्वनाथम् ॥६॥

(6.) tejo-mayaṁ saguṇa-nirguṇam advitīyam
ānanda-kandam aparajitam aprameyam
nādātmakaṁ sakala-niṣkalam ātma-rūpam
vārāṇasī-pura-patim bhaja viṣva-nātham